# Kalpandrishtipujastuti Stotram

# કલ્પાન્દૃષ્ટિપૂજાસ્તુતિસ્તોત્રમ્

## Document Information

Text title : Kalpandrishtipujastuti Stotram

File name : kalpAndRRiShTipUjAstutistotraM.itx

Category : devii, devI, dashamahAvidyA, pUjA, panchadashI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : panchadashIstavarAjamAlikA compiled by Lalitha Ramani

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

Kalpandrishtipujastuti Stotram

# કલ્પાન્દૃષ્ટિપૂજાસ્તુતિસ્તોત્રમ્

(શ્રીષોડશોપચાર માનસિકમન્ત્રોક્તવિધિના દેવતાસ્તુતિઃ)

શ્રીગણેશાય નમઃ ।

ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।

કલ્યાણોજ્વલકાર્મુકાનિક્તકલાનન્દેનમન્દસ્મિતાં
    કારુણ્યાઙ્કુશપઞ્ચબાણકલિતાં કન્દર્પદર્પોજ્જ્વલામ્ ।
કામ્યાકર્ષણ દિવ્યપાશાભરિતાં બાલાર્કકોટિપ્રભાં
    આદિક્ષાન્તતનુત્રયાં ત્રિનયનાંડપ્રાયેચ્છિવાં શામ્ભવીમ્ ॥ ૧॥

એકાકારતયા પ્રપઞ્ચભરિતામેકાન્તસઞ્ચારિણીં
    એણીકાજ્વલસંવિદામ્પરકલામેણામબિમ્બાં પરામ્ ।
એકોદેવ ઇતિ પ્રસિદ્ધમનુભિઃ પ્રાખ્યાત ચિન્માતૃકાં
    એકારાઙ્કિત બૈન્દવી પરશિવામેકાક્ષરીમાહુવે ॥ ૨॥

ઈશાનાદિ મહેન્દ્રરુદ્રપરિષદ્ બ્રહ્માદિપાદોન્નતા
    લઙ્કારાઙ્કિતદિવ્યરત્નવિલસત્ સિંહાસનેસુસ્થિરામ્ ।
ઈષદ્ભક્તિતયા ત્વદીય ચરણામ્ભોજાર્ચનોદીક્ષવાન્
    ઇચ્છાજ્ઞાનક્રિયાત્મકાસનમિદં ગૃહ્ણાતુતે શામ્ભવમ્ ॥ ૩॥

લક્ષાજ્ઞાનમયં સુધાર્ણવજલેનાપૂર્યપાત્રાર્પિતં
    લાક્ષાલઙ્કૃતપાદપઙ્કજયુગેસઙ્ક્ષોભ્યભક્ત્યાપુનઃ ।
લક્ષ્મીરઞ્જિતહેમધામકલશેનાપૂર્યશીતામ્બુના-
    સ્વા ચામાર્થમિદં પ્રકલ્પિતમદે ગૃહ્ણત્વં હે શામ્ભવી ॥ ૪॥

હ્રીઙ્કારોજ્વલવર્ણકલ્પિતકલાલઙ્કારસિંહાસને
    હ્રીઙ્કારાદિસમસ્તસિદ્ધકલનૈઃ સંસ્તૂયમાને મુદા ।
ગાઙ્ગં ચન્દ્રસચન્દનં હિમજલે સસ્યાનિજાનેક્ષતી
    માતર્દેવિ કૃપાં કુરુત્વમધુના સ્નાનેત્વમઙ્ગીકુરુ ॥ ૫॥

હવ્યાગૂઢતનુપ્રકાશસુભગે ક્ષૌમામ્બરો ભક્તિતે
    હંસસ્ફાટિકચન્દ્રિકાભિરમલં તન્વોત્તુરીમાંસિસમ્ ।
હારાલઙ્કૃતપીવરસ્તનભરામાનન્દમન્દસ્મિતા
    હવ્યાતીતમથામનઙ્ગ વિભવામારાધયામામ્બિકામ્ ॥ ૬॥

સૌવર્ણોજ્વલરત્નકુણ્ડલધરાં સૌભાગ્યનાસામણિ
    સાન્દ્રાનન્દકરીપ્રસિદ્ધમણિભિઃ સોહઙ્કિરીટંશુભમ્ ।
સર્વાલઙ્કૃતબાહુદણ્ડયુગલ ગ્રૈવેયહારાન્ બહૂન્
    સલ્લોપાચિત હારનૂપુરયુગં ગૃહ્ણાતુતે શામ્ભવી ॥ ૭॥

કસ્તૂરિઘનસારકુઙ્કુમરજોગન્ધોત્કટચ્ચન્દનં
    કર્પૂરચ્છવિ હારકાભિરમલં ભક્ત્યાસમર્પ્યાક્ષતૈઃ ।
કલ્હારોજ્વલજાતિપઙ્કજરજઃ પદ્મૈશ્ચસૌકેતકી
    વનમલ્લિકા કલ્પવૃક્ષકુસુમૈરભ્યર્ચવામીશ્વરીમ્ ॥ ૮॥

હાહાકારરવપ્રસિદ્ધકલતા હાકારહન્તાત્મકં
    ભૂયોદેવિ હિ કલ્પયામિ સતતં બ્રહ્મેન્દ્રવન્ધેશિવે ।
હમ્બીજાર્ધ કલાત્મિકાં તવિભવેમલ્યાદિચક્રાઙ્કિતે
    હારિદ્રાઙ્કિતહેમધામકલશે ગૃહ્ણીષ્વદીયમ્મહત્ ॥ ૯॥

લમ્બીજાઙ્કિતસિદ્ધમાર્ગસહજૈર્દ્રવ્યૈરનન્તૈર્મુદા-
    લઙ્કારાઙ્કિતવદ્ભિભાનુશશિભિઃ પાત્રસુધાપૂરિતૈઃ ।
લિપ્તામોદ મારીચિહિઙ્ગુસુરભિઃ યુક્તૈસ્તુભક્તૈઃ સદા
    લક્ષ્મીચ્ચક્રનિવાસિનીં કમલનીં સન્તર્પયામીશ્વરીમ્ ॥ ૧૦॥

હ્રીઙ્કારત્રયવર્ણપીઠનિલયે હ્રીઙ્કારમન્ત્રાત્મિકે
    હ્રીઙ્કારોજ્જ્વલ હેમધામચષકેસિધન્નભક્ષાન્ વહન્ ।
હ્રીંશ્રીઙ્કુલ્પિતકામધેનુનિયતઃ ક્ષીરાજ્યમધ્વાસ્યત
    હ્રીઙ્કારેણ નિવેદયામિ સતતં હ્રીઙ્કારનાદપ્રિયે ॥ ૧૧॥

સર્વામ્નાયપરાપરાન્તસલિલં સૌગન્ધગન્ધૈર્યુતં
    સૌન્દર્યેશ્વરવલ્લભે પરેશિવે ગૃહ્ણીયહસ્તોદકમ્ ।
સલ્લાયાણીવકૌતુકામૃતરસં સમ્પૂર્ણચન્દ્રપ્રભં
    સત્કરહારયુતં ગૃહાણ વરદે તામ્બૂલમવ્યાસ્યતમ્ ॥ ૧૨॥

કાદિક્ષાન્તસ્વરાદિવર્ણમણિભિઃ સઙ્કીર્ણદીપાઙ્કુરાં
    કાલૈકત્રયપઞ્ચસપ્તરવકનૈવર્ણપાત્રૈમુદા ।

કાવ્યાલઙ્કૃત નાટકાવિશ્રુતિભિઃ સઙ્ગીતનૃત્યૈર્મુહુઃ
    કલ્લોલાન્તમિદઙ્ગૃહાણવરદે નીરાજનન્નિર્મલમ્ ॥ ૧૩॥

લાવણ્યાઙ્ગદૈમદીયપઞ્ચકમિદં સન્માર્ગમાર્ગાદયં
    છત્રઞ્ચામરદર્પણં ચમજનં દત્વાશિવેશ્રાદરાત્ ।
લીલાપૂજિતપાદપઙ્કજયુગે સમ્પૂજ્યગન્ધાક્ષતૈઃ
    લક્ષ્મીરઞ્જિતપાદુકા તુ વિભવાં સન્તર્પયામીશ્વરીમ્ ॥ ૧૪॥

હ્રીઙ્કારીશિવતત્વમચ્યનિલયાં હ્રીઙ્કારમન્ત્રાત્મિકાં
    હ્રીઙ્કારત્રયવાગ્ભવાદિમનુભિઃ સંશોધ્યતત્વઞ્ચયઃ ।
ત્ર્કાદિસહાદિકાદિમનુભિર્મત્વાપુનઃશામ્ભવીં
    સ્તુત્વા શઙ્કરવલ્લભાં ત્રિનયનામુદ્ભાસયામીકરીમ્ ॥ ૧૫॥

વન્દેશપાદાર્વિતદૃષ્ટિમુમયાનિમાલ્યવિજાર્ચિવિધાસમર્થઃ
દુઃખાવલીક્ષેત્રપતેપ્રવક્ષ્ય વિશ્રામયે ભક્તિજનૈર્મુહુર્મુદા ॥ ૧૬॥

ધ્યાનાવાહનમાસનાર્ચ્યકમિદં સ્નાનામ્બુકં ભૂષણં
    ગન્ધઞ્ચાક્ષતપુષ્પધૂપમમલં જ્યોતિં ચ નૈવેદ્યકમ્ ।
તામ્બૂલાર્ઘ્યકચ્છત્રચામરયુગં રત્નોજ્વલન્દર્પણં
    માપૂરવ્યજનમ્પ્રદક્ષિણશતં નમસ્કારાન્ ગૃહાણામ્બિકે ॥ ૧૭॥

કલ્યાણસ્તુતિમેતદીયમમલં હ્રીઙ્કારમન્ત્રાત્મકં
    સર્વામ્નાયકરં મહત્કવિજનોલઙ્કારહ્રીઙ્કારદમ્ ।
સર્વજ્ઞાદિસમસ્તસિદ્ધકમલૈ સંસ્તૂયમાનૈર્મુદા
    ભક્ત્યાસ્તોત્રમિદં પઠેત્ પ્રતિદિનં હ્રીઙ્કારમેતિક્ષણત્ ॥ ૧૮॥

ઇતિ શ્રીરુદ્રયામલે ઉમામહેશ્વરસંવાદે
        કલ્પાન્દૃષ્ટિપૂજાસ્તુતિસ્તોત્રં સમાપ્તમ્ ।

Proofread by Rajesh Thyagarajan

*Kalpandrishtipujastuti Stotram*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*